National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(59): 243-246
© 2025 NJHSR
www.sanskritarticle.com

U.S.V.N. Sailaja
Research Scholar,
Department of Agama,
National Sanskrit University,
Tirupati- 517507

Correspondence:
U.S.V.N. Sailaja
Research Scholar,
Department of Agama,
National Sanskrit University,
Tirupati- 517507

# श्रीमाहेश्वरतन्त्रे श्रीकृष्णस्य सगुणलीलावर्णनम्

**U.S.V.N. Sailaja**

**अमृताध्मातमेघाभममृताहरणं विभुम्।**
**पाञ्चरात्रप्रवक्तारं वन्दे वैकुण्ठभूपतिम्।।**

इह जन्मनि सर्वे मानवाः सुखमेव वाञ्छन्ति। तत्सुखमैहलौकिकं पारलौकिकमिति द्विविधम्। मोक्षप्राप्तये नैके उपायाः लोके विद्यन्ते। तेषु भक्तिप्रपत्ती मुख्यतमौ स्याताम्। भगवतः श्रीमन्नारायणस्य समाराधनं भक्त्या क्रियमाणेन भगवदनुकम्पां प्राप्नुवाम। ईदृश-माराधनं बोधयति पाञ्चरात्रदिव्यशास्त्रम्। वैष्णवागमः वैखानसपाञ्चरात्रभेदेन द्विविधः। वैखानसं भगवतः विष्णोरंशत्वेन समुत्पन्नस्य विखनमहर्षेः उपदेशः। विखनो मुनिः भृगु-अत्रि-कश्यप-मरीचिभ्यो चतुर्भ्यो महर्षिभ्यो वैखानसशास्त्रमुपदिदेश। पाञ्चरात्रं भगवतः श्रीमन्नारायणस्यानुग्रहविशेषेण सार्धकोटिश्लोकैः महालक्ष्मीः, चतुर्मुखः, आदिशेषः, वैनतेयः विष्वक्सेनः इति पञ्चेभ्यो पञ्चरात्रिषूपदिष्टत्वात्पाञ्चरात्रमिति नामावाप।

तदिदं पाञ्चरात्रं एकायनम्, मूलवेदः भागवतमिति च विशेषेण प्रथते। पाञ्चरात्र-शब्दस्य नैकानि निर्वचनानि विद्यन्ते। भाषाविज्ञानदृष्ट्या, निरुक्तकारदृष्ट्या, व्याकरणदृष्ट्या वा परिशील्यमाने सति मतभेदोऽयं स्पष्टतया बोध्यते। आधुनिकाः अनुसन्धातारः विषयेऽस्मिन् बहुपरिश्रममकार्षुः। किञ्च संहितासु यानि निर्वचनानि सन्ति तान्येवास्मकं प्रमाणभूतानीति पाञ्चरात्रागमविदुषामाशय एव शिरोधार्यः। बह्व्यः संहिताः पाञ्चरात्रागमशब्दनिर्वचने अग्रेसरा -स्सन्ति। विहगेन्द्रसंहितायां प्रथमपटले सप्तमश्लोके-

**आदौ कृतयुगे प्राप्ते केशवेन प्रसादिता ।**
**अनन्तो गरुडश्चैव विष्वक्सेनः कपालभृत् ।।**[1] इति

शास्त्रोत्पत्तिः विवृतः। श्रीप्रश्नसंहितायां द्वितीयाध्याये चत्वारिंशच्छलोके -

**रात्रिरज्ञानमित्युक्तं पञ्चेत्यज्ञाननाशकम्।**
**तच्छास्त्रं पाञ्चरात्रं स्यादन्वर्थस्यानुरोधतः ।।** इति ।

**पुरुषोत्तमसंहितायां प्रथमाध्याये चतुर्थश्लोके -**

**भगवद्भक्तिरेव स्यात् भक्तानां मुक्तिकारणम्।**
**तद्भक्तिबोधकं शास्त्रं पाञ्चरात्रागमं स्मृतम् ।।**[2] इति ।

**ईश्वरसंहितायाम् -** **सुदर्शनाद्याः हेतीशाः पञ्चब्रह्मर्षिरूपताः।**
**समुत्पन्नाः क्षितितले पौण्ड्रवर्धस्थलादिषु।।**
**पञ्चायुधांशास्ते पञ्चशाण्डिल्यश्चौपगायनः।**
**मौञ्जायनः कौशिकश्च भारद्वाजश्च योगिनः।।**
**पञ्चापि पृथगेकैकं दिवारात्रं जगत्प्रभुः।**
**अध्यापयामास यतः ततस्तन्मुनिपुङ्गवाः ।।**[3] इति ।

**अहिर्बुध्न्यसंहितायाम् -**

**तत्परव्यूहविभवस्वभावादिनिरूपणम्।**
**पाञ्चरात्राह्वयं तन्त्रं मोक्षैकफललक्षणम् ।।**[4] **इति ।**

श्रीमन्नारायणस्यावतारवैभवप्रतिपादकं मोक्षदायकं शास्त्रमेव पाञ्चरात्रमिति कथ्यते।

**भगवता बादरायणेन श्रीमन्महाभारते -**

**एकमेकं सांख्ययोगं वेदारण्यकमेव च।**

**परस्पराङ्गान्येतानि पञ्चरात्रं तु कथ्यते।।**[5] इति ।

चत्वारि शास्त्राणि संभूयैकमिति पञ्चविधज्ञानसमाहारात् पाञ्चरात्रमिति संज्ञा विधत्ता। **पाञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयमिति** कृष्णद्वैपायनवचनं द्योतयति शास्त्रस्यास्य महत्ताम्। **अनिरुद्ध-संहितायाः द्वितीयेध्याये** ऋषीणां संशयापनोदनार्थं भृगुणा-

**पाञ्चरात्रं महत् ज्ञानं नारायणसमीरितम्।**

**पञ्चरात्रात्परं शास्त्रं न भूतो न भविष्यति।।**

**आदित्यानां यथा विष्णुः रुद्राणां शङ्करो यथा।**

**वेदानां सामवेदस्तु नराणां च नराधिपः ।।**[6] इति प्रोक्तम्।

**कण्वसंहितायां चतुर्थेऽध्याये** स्वयं भगवान् ऋषिभ्यः प्रति –

**रात्रं तु ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम्।**

**सदाचारात्मकं ज्ञानं स्वात्मनश्च परात्मनः।।**

**जगतश्च विवेकेन ज्ञानमर्चात्मकं तथा।**

**पञ्चप्रकारता यत्र समेत्य दृश्यते बुधैः**[7]।। इत्युवाच।

पञ्च, रात्र इति पदद्वययोजनेन पाञ्चरात्रमुत्पद्यते। रात्रिशब्दः संख्यारात्रं क्लीबमिति[8] सूत्रेण रात्र इति परिणमति। रात्रशब्देन ज्ञानमिति भगवतः श्रीमहाविष्णोः सान्निध्यप्राप्तिबोधक - माराधनाशास्त्रं ज्ञापयतीति हेतोः पाञ्चरात्रमिति कथ्यते। अत्र पञ्चशब्दः

**श्रीशेषपक्षीश्वरपद्मगर्भसेनेशमुख्यान् प्रतिबोधयन्तम् ।**

**श्रीपाञ्चरात्रागमदिव्यशास्त्रं विष्णुं सदाहं शरणं प्रपद्ये ।।**[9] इत्युक्तदिशा

वस्तुतः पाञ्चरात्रशब्दस्य विभिन्नार्थाः बह्वीषु संहितासु सन्दृश्यन्ते। विश्वामित्रसंहितायां पञ्चेन्द्रियाणि, शब्दादिपञ्चविषयाः अभिधीयन्ते। तेषां सर्वेषां ग्राहकाः नराः इति, पञ्चरान् मानवान् त्राणनहेतोः पाञ्चरात्रमित्युक्तम् ।

कृत्स्नं पाञ्चरात्रं प्रधानतया ज्ञान-योग-क्रिया-चर्या इति चतुर्धा विभक्तम्। ज्ञानपादे सृष्टेः स्वरूपनिरूपणम्, ब्रह्माण्डानां समग्रविवरणं वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धव्यूहानां सम्पूर्णविवरणं कृतम्। मुक्तानां स्वरूपविवरणं मुक्तिप्राप्त्युपायाः भुवनकोशस्वरूपनिरूपणम्, व्यूह-स्वरूपं तन्महिमा इत्यनेके अंशाः निरूपिताः ।

द्वितीये योगपादे योगविभगः, यमादिनां अष्टाङ्गयोगानां समग्रविवरणं योगशक्त्या भगवदाराधनं विधाय भगवदनुग्रहप्राप्तये मार्गाः, योगमहिम्ना आत्मसाक्षात्कारप्राप्तिः विविध-साधनमार्गाः सुष्ठु प्रोक्ताः। योगसाधनद्वारा आत्मज्ञानपूर्वककर्मानुष्ठानेन परमात्मोपा-सनाशक्तिः तत्फलञ्च विवृतम्।

तृतीये क्रियापादे देवालयनिर्माणान्तर्गतकर्षणादिप्रतिष्ठादारभ्य उत्सवान्तं प्रोक्ताः ।

चतुर्थे चर्यापादे देवालये प्रतिष्ठितानां मूर्तीनां मानादिनिरूपणं देवालये प्रतिष्ठोपकरणानां विविधवस्तूनां परिमाणनिरूपणं शिष्याचार्यलक्षणानि देवालये सर्वविधक्रियाकलापेषु भक्तैः कार्मचारिभिः तथान्यैः आवर्षं क्रियमाणानां ज्ञाताज्ञातदोषाणं परिहारपूर्वकप्रायश्चितविधयः संपूर्णतया निरूप्यन्ते ।

पाञ्चरात्रसिद्धान्ते सर्वे ग्रन्थाः संहिता इति नाम्ना विद्योतन्ते। एवं तन्त्रमित्यपि व्यवहारः। इमाः संहिताः विभिन्नपण्डितानामभि-प्रायानुसारं पार्थक्येन दृश्यन्ते। तथापि 248 संहिताः इति पाञ्चरात्रकोविदैः परिगणितम। तत्रापि सात्त्वतपौष्करजयाख्यसंहिताः रत्नत्रयमिति नाम्ना व्यह्रियन्ते। तासामपि विवरणभूताः ईश्वरपाद्मपारमेश्वरसंहिताः प्रख्याताः। तथैव अहिर्बुध्न्य-संहिता, कपिञ्जलसंहिता, विहगेन्द्रसंहिता, विष्वक्सेनसंहिता, पुरुषोत्तम-संहिता, विश्वामित्र-संहिता, भारद्वाजसंहिता इत्यादयः सुप्रसिद्धाः पाञ्चरात्रसंहिताः लोके पाञ्चरात्रस्य वैशिष्ट्यं प्रामुख्यं महत्त्वञ्च जगद्विख्यातं चक्रिरे। पाञ्चरात्रस्य एकायनम्, सात्त्वतम्, मूलवेदः इत्यादीनि नामान्तराणि सन्ति। **श्रीप्रश्नसंहितायाम् –**

**रात्रिरज्ञानमित्युक्तं पञ्चेत्यज्ञाननाशकम् ।**

**तच्छास्त्रं पाञ्चरात्रं स्यादन्वर्थस्यानुरोधतः ।।**[10] **इति,**

रात्रिः अज्ञानसङ्केतः, पञ्च इति संख्यावाचकः अज्ञाननाशनहेतोः पाञ्चरात्रमिति प्रोक्तम् ।

**पाद्मसंहितायां ज्ञानपादे –**

**पञ्चेतराणि शास्त्राणि रात्रीयन्ते महान्त्यपि ।**

**तत्सन्निधौ समाख्यातौ तेन लोके प्रवर्तते ।।**

**चन्द्रतारागणं यद्वत् शोभते नैव वासरे ।**

**तथेतराणि शोभन्ते पञ्च नैवास्य सन्निधौ ।।**

**पञ्चत्वमथवा यद्वद्दीप्यमाने दिवाकरे।**

**ऋच्छन्ति रात्रयस्तद्वदितराणि तदन्तिके**[11]**।। इति**

नाम यथा सहस्रमयूखैर्युतभानोः सन्निधौ चन्द्रतारागणं कान्तिहीन भवेत्तथैव पाञ्चरात्रेतरशास्त्राणि पाञ्चरात्रपक्षे रात्रीयन्त इति प्रथमाध्याये त्रिभिः पाञ्चरात्रवैभवं प्रतिपादितम्। पाञ्चरात्रागमः आगम-मन्त्र-तन्त्र-तन्त्रान्तर इति सिद्धान्तचतुष्टयेन विराजते।

**ईश्वरसंहितायाम् - चतुर्धा भेदभिन्नोऽयं पाञ्चरात्रामं भिदम् ।**

**पूर्वागमसिद्धान्तं द्वितीयं मन्त्रसंज्ञितम्।**

**तृतीयं तन्त्रसिद्धान्तमन्यत्तन्त्रान्तरं भवेत्**[12]**।। इति**

प्रमाणमत्र सूच्यते। पाञ्चरात्रं सर्वमपि ज्ञान-योग-क्रिया-चर्या इति पादचतुष्टयेन विद्यते। प्रायशः अस्मिन् सिद्धान्ते 240 अधिकसंहिताग्रन्थाः विद्यन्ते। संप्रति प्रायशः सप्तत्यधिकग्रन्था एव उपलभ्यन्ते। पाञ्चरात्रे ग्रन्थानां संहिता तन्त्रमित्यपि व्यवहारो विद्यते। श्रीमद्भागवते सात्वतधर्म इति, भागवततन्त्रं इति व्यवहारः दृश्यते। **डा.आर्.जि.भण्डार्करमहोदयः Vaishnavisam Saivisam and mind Religion** इत्यस्मिन् ग्रन्थे क्रिस्तोः तृतीयशताब्दात्प्रागेव तन्त्रशब्दाभिधेयाः ग्रन्थाः विद्यन्ते इत्युक्तवान्।तन्त्रशब्दः धारणा, विशेषज्ञानम्, रहस्यमित्याद्यर्थेषु आगमसाहित्ये प्रस्तावितः।

**शैवसंप्रदाये कामिकागमे –**

**तनोति विपुलानर्थान् तत्त्वमन्त्रसमन्वितान्।**
**त्राणं च कुरुते यस्मात्तन्त्रमित्यभिधीयते**[13]**।। इति**

तन्त्रशब्दः रक्षणार्थे निरूपितः। वाराहितन्त्रे सृष्टिः, प्रलयः, देवतार्चनम्, साधनसिद्धिः, पुरश्चरणम्, ध्यानं, योगः, षट्कर्मसाधनत्वं इति अष्टप्रकारैः तन्त्रशब्दः निरूपितः। यथा–

**सृष्टिश्च प्रलयश्चैव देवतानां तथार्चनम्।**
**साधनं चैव सर्वेषां पुरश्चरणमेव च।।**
**षट्कर्मसाधनं चैव ध्यानयोगश्चुर्विधः।**
**सप्तभिर्लक्षणैर्युक्तमागमं तद्विदुर्बुधाः**[14]**।। इति।**

पाञ्चरात्रग्रन्थेषु श्रीमाहेश्वरतन्त्रमिति ग्रन्थः नारदपाञ्चरात्रे अन्तर्भवति। नारदपाञ्चरात्रे ज्ञान-योग-चर्यापादान्तर्गताः विषयाः विवृताः। श्रीमाहेश्वरतन्त्रग्रन्थः ज्ञानपादे अन्तर्भवति।

अयं ग्रन्थः महेश्वरेण स्वपत्न्यै उमायै भगवतः श्रीकृष्णस्य वैभवप्रतिपादनपरत्वेन उपन्यस्तः। अस्मिन् तन्त्रे 51पटलाः 3060श्लोकाः विद्यन्ते। अस्मिन् तन्त्रे ब्रह्मज्ञानजिज्ञासूनां तत्त्वज्ञान - प्रबोधकसाधनीभूतविषयाः विवृताः। पाञ्चरात्रे विष्णुप्रोक्तानि पञ्चविंशतितन्त्राणि विद्योतन्ते। तेषु श्रीमाहेश्वरतन्त्रमन्यतमम्।

तन्त्रशब्दः वैदिकागमेषु विशेषार्थे प्रयुक्तः। प्रायशः वैष्णवशैव-शाक्तागमेषु तन्त्रशब्दार्थः ज्ञानार्थकत्वेन निरूपितः। तथापि विश्वसारकामिकादिशैवागमेषु ज्ञानविस्तारः नाम सृष्ट्यादिभौतिक - रहस्यानां विवरणपूर्वकत्वात्तन्त्रशब्दः रक्षार्थे प्रयुक्तः। आध्यात्मिक-मन्त्राणां समनुष्ठानेन भौतिका-पदानां निवारकाः तान्त्रिकग्रन्था इति **स्पष्टं** ज्ञायते।

**विश्वसारतन्त्रे -**

**आज्ञावस्तुसमन्ताच्च गम्यत इत्यागमो मतः।**
**तनुते त्रायते नित्यं तन्त्रमित्थं विदुर्बुधाः**[15]।।इत्युक्तम्।

शाण्डिल्यादिमहर्षिभ्यः भगवता विष्णुना उपदिष्टेषु पाञ्चरात्रदर्शन-ग्रन्थेषु बहवः ग्रन्थाः सृष्ट्यादि –

सर्वविधतत्त्वानां स्वरूपनिरूपणादिकृतम्। मननशीलानां मुमुक्षूनां मोक्षप्राप्तये भगवदुपासना, तदार्चनं वा विशेषमिति आचारणमिति ज्ञायते। जितेन्द्रियेण वासुदेवादाचातुर्व्यूहानां संपूजनेन भगवन्तं प्राप्नोतीति आगमग्रन्थाः निरूपयन्ति।

माहेश्वरतन्त्रे एकादशपटले भगवतः कृष्णस्य सगुणलीलावर्णनम्, तृणावर्तस्योद्धारः एवं राधायाः जीवनविशेषानुद्धिस्य स्वपत्न्यै पार्वत्यै परमशिवः विस्तृततरूपेण कथयामास। प्रायशः पञ्चचत्वारिंशच्छलोकैः व्रजगोपिकाभ्यः श्रीकृष्णस्य लीलारसास्वादः सम्यग्विवृतम्। कंसेन प्रेषितानां पूतनाशकटासुरतृणावर्तादिराक्षसानां संहारकथनं परमेश्वरे-णोक्तम्। भगवान् कृष्णः पूतनायाः स्तनं पीत्वा क्षीरेण सह क्षीरगतविषं तस्मात्पञ्चप्राणान्यपि आकृष्य जघान। तृणावर्तं राक्षसं आकाशस्योपरि स्वशक्तिलाघवेन संताड्य मारितवान्। मातुः यशोदायाः बाललीलाविनोदेन स्तनं पीत्वा केवलं जृम्भमाणेन चर्तुदशभुवनानि भगवान् कृष्णः मुखे प्रादर्शि। इयं लीला कृष्णः मृद्भक्षणं कृत्वा मातुः दर्शितवान्। नन्दव्रजस्थानां सर्वेषां गोपजनानामलौकिकानन्दप्राप्तये दधिदुग्ध - नवनीतादिमधुरपदार्थानामाहरणम्, पारिवारिकस्त्रीणां मध्ये परस्परकलहोत्पादनमित्यादिबाललीला विनोदानुभावः प्रभुः कृष्णः निरूपितवान्। **यथोक्तम्–**

**श्रीमाहेश्वरतन्त्रे -**

**तृणावर्त्तमथाकाशे हरन्तमहनद्ध्वरिः।**
**स्तनं पीत्वा यशोदायै जृम्भमाणस्तु केवलम्।**
**मुखे प्रदर्शयामास भुवनानि चतुर्दश।**
**बाललीलाविनोदेन मृदमश्नन् कृपानिधिः।।**
**अकल्पयद्देहयोगं कुमाराणामलौकिकम्।**
**नाश्नाति मृदमानन्दो दधिदुग्धान्यपि स्वयम्।**
**पुष्ट्यर्थं च कुमाराणामकरोत्सकलं प्रभुः।**
**व्रजस्थाः गोपिकाः सर्वाः कृष्णलीलाहृताशयाः।**
**विलोभयन्त्यः श्रीकृष्णं दास्ये दुग्धं दधीन्यपि**[16]**।। इति**

नन्दव्रजे सर्वाः गृहिण्यः बालं मधुसूदनमालिङ्ग्य मुखमाचुम्ब्य च कृष्णानन्दमनुभवः लब्धवन्तः। गोपिकाहृदयानन्दमावर्धयन् तानपि प्रतिचुम्बनेन कृष्णानन्दकुतूहलमानसाः मनोभावितरतिचेष्टिताः बभूवुः। अन्यापि गृहमानीय खाद्यपानैरातोष्य विशिष्टालंकारैरलंकृत्य सुगन्धादिभिः संलेप्य शुभासने समावेश्य निर्भयेन विनोदादिभिः रमन्ते। तासु काश्चन **मान्यत्र गच्छ! ते माता अवश्यं ताडयिष्यती**ति व्रजार्भकं बालकृष्णं प्रेमातिशयबद्धाः गोपिकाः उपदिशेरन्। अन्याः काश्चन नवनीत -चौर्यादिचेष्टितैः पीडिताः संकृद्धाश्च व्रजगृहिण्यः हस्तयोः सूत्रेण बद्धा **भवान् यदि नृत्यति साह्लादं दास्ये तव मनोरथमि**त्यूचुः। तेन रभसा नृत्यति सः कृष्णः। तुष्टः गोपिकाः कृष्णकटाक्षाभिलाष -मानसाः शृङ्लान् विसृद्य कृष्णस्य किमपेक्षितमिति पप्रच्छुः। संतुष्टः सः बालः त्वदीय हृदयदेशे कन्दुकद्वयमपेक्षते। ताभ्यां सह गोपमित्रैः सह क्रीडाविनोदमनुभवमि। तदुक्तं

**श्रीमाहेश्वरतन्त्रे -**

**वत्रे नृत्यविधानार्थं कामं देहि प्रतिश्रुतम्।**
**कस्ते कामस्तयोक्तोसौ वत्रे कृष्णः स्ववाञ्छितम्।।**
**त्वदीयहृदये भाति कन्दुकद्वयमुत्तमम्।**
**देह्येतद्रमणार्थाय मित्रैः गोपसुतैः सह**[17]**।। इति।**

अज्ञानजनितवाक्यमिदं श्रुत्वा गोपिकास्त्रियः असकृदुच्चैः जहासतः। भवता पृष्टं कन्दुकद्वयं वृषभानुसुतायाः त्वयि प्रेमविह्वलायाः लोकोत्तरसौन्दर्यभामिन्याः राधिका नामविश्रुतायाः सन्निधौ उपलभ्येते इत्यूचुः। संतुष्टः कृष्णः **श्रृङ्गाररसशास्त्रविशारदाः गोपिकास्त्रियः संयोगो विप्रलम्भयोः भेदाभेदपरायणाः युष्माकमिदं**

**सामान्यज्ञानमेवेति मे मतिः** इत्युवाच। व्रजस्त्रियः पुरुषोत्तमं कूटस्थोऽक्षरं चिदानन्दं परमात्मानं श्रीकृष्णं प्रति अचञ्चलभक्त्या प्रार्थयामासुः। कृष्णं कमलपत्राक्षं सर्वलोकनमस्कृतं ज्ञानानन्दसत्कृतं लीलारसविनोदिनं कृष्णपरमात्मानं भक्त्या स्तोत्रं चक्रुः। **यथा श्रीमाहेश्वरतन्त्रे -**

**सजातीयविजातीयस्वगतैश्च सुलोचने ।**
**ब्रह्मत्वे ह्यक्षरस्यापि आनन्दो द्विदलात्मकः।।**
**सदंशबीजमूला च प्रकृतिर्ह्यक्षरात्मिका**
**न तस्माद्रसलीलायाः स्थितः कूटस्थ ईश्वरे।**
**प्रकृतेश्च परत्वाच्च निर्गुणत्त्वान्महेश्वरी।।**
**उत्तमे पुरुषे पूर्णे ह्यानन्दात्मनि केवले ।**
**लीलारसमयी रम्याः प्रतिक्षणनवास्थिता[18] ।।इति।**

अस्मिन् पटले सर्वाः व्रजस्त्रियः गुणलीलादिदृक्षयुक्तासनाप्रिया-वतंसाः याः ताः कृष्णेन सह लीलारसेन संक्रीडन्ते स्म। स्वामिनी मानसभामिनी सुन्दरलोचनावनी बृन्दावनेश्वरी लवमात्रकाला – वच्छिन्ना विरहभमिनी या सुन्दरी राधास्वरूपेण कृष्णस्य मनोहारिणी इति प्रकीर्तिता। यशोदा -नन्दनं कृष्णं गोपीमानसहारं स्वप्ने सन्ततं क्रीड्यमानं मया साकमधरास्वादनं पिबन्तमनुभूयते। यस्मिन् दृष्टे ममाङ्गेषु कृष्णस्मरणहेतोः स्वेदरोमाञ्चकत्वं वेपथुः स्वरभङ्गः जायते। श्रीकृष्णमूर्ति-दर्शनेन मनसि ब्रह्मानन्दानुभवः अन्तर्हीतो विराजते। कृष्णनामानुसन्धानेन ममात्मा पूतो भवति। अधरयोः कृष्णशब्दः शरीरस्यामृतत्वं तथाऽऽत्मनो अमृतधामप्राप्तये निदानभूतः मे भातीति राधायाः विशिष्टभावानां जगदम्बा पार्वत्यै शङ्करः उपदिदेश।

<u>**उपयुक्तग्रन्थसूची**</u>


1. **शेषसंहिता –** एल् श्रीनिवासाचार्यः- मैसूरु – 1935.
2. **श्रीमाहेश्वरतन्त्रम्-** डा.सुधाकरमालवीयः– चौकम्बा कृष्णदास अकादमी- वारणासी - 1997.
3. **पाद्मसंहिता –** एस् पार्थसारथि अय्यङ्गार – मैसूरु- 1891.
4. **ईश्वरसंहिता-** पि. बि. अनन्ताचार्यस्वामि-शास्त्रमुक्तावलीशीरीस - -काञ्चीपुरम्- 1921.
5. **श्रीप्रश्नसंहिता-**सीता पद्मनाभनम्-रा.सं.विद्यापीठम्- तिरुपतिः – 2006.


**सन्दर्भः**

1 विह.सं 1.7
2 श्रीपश्न.सं 2.33
3 ई.सं 2.22-24
4 अहि.सं 1.18
5 महा.भा.12.336.76
6 अनि.सं 1.33
7 कण्व.सं2.22,23
8 पा.सू.
9 विष्व.सं.4.22
10 श्री.प्र .2-40
11 पा.ज्ञ -1-72,73,74
12 ई.स - 21-560
13 कार.आ
14 वा.त. 3.28-29
15 विश्व.त – 3.12
16 मा.त - 11.2-5
17 मा.त - 11.15,16
18 मा.ता - 11.26,27